# Shri Kalabhairavashtakam

# શ્રીકાલભૈરવાષ્ટકમ્

## Document Information

Text title : kAlabhairavAShTakam2

File name : kAlabhairavAShTakam.itx

Category : shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, aShTaka

Location : doc_shiva

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 20, 2020

*sanskritdocuments.org*

# શ્રીકાલભૈરવાષ્ટકમ્

અઙ્ગસુન્દરત્વનિન્દિતાઙ્ગજાતવૈભવં
ભૃઙ્ગસર્વગર્વહારિદેહકાન્તિશોભિતમ્ ।
મઙ્ગલૌઘદાનદક્ષપાદપદ્મસંસ્મૃતિં
શૃઙ્ગશૈલવાસિનં નમામિ કાલભૈરવમ્ ॥ ૧॥

પાદનમ્રમૂકલોકવાક્પ્રદાનદીક્ષિતં
વેદવેદ્યમીશમોદવાર્ધિશુભ્રદીધિતિમ્ ।
આદરેણ દેવતાભિરર્ચિતાઙ્ઘ્રિપઙ્કજં
શૃઙ્ગશૈલવાસિનં નમામિ કાલભૈરવમ્ ॥ ૨॥

અમ્બુજાક્ષમિન્દુવક્ત્રમિન્દિરેશનાયકં
કમ્બુકણ્ઠમિષ્ટદાનધૂતકલ્પપાદપમ્ ।
અમ્બરાદિભૂતરૂપમમ્બરાયિતામ્બરં
શૃઙ્ગશૈલવાસિનં નમામિ કાલભૈરવમ્ ॥ ૩॥

મન્દભાગ્યમપ્યરં સુરેન્દ્રતુલ્યવૈભવં
સુન્દરં ચ કામતોઽપિ સંવિધાય સન્તતમ્ ।
પાલયન્તમાત્મજાતમાદરાત્પિતા યથા
શૃઙ્ગશૈલવાસિનં નમામિ કાલભૈરવમ્ ॥ ૪॥

નમ્રકષ્ટનાશદક્ષમષ્ટસિદ્ધિદાયકં
કમ્રહાસશોભિતુણ્ડમચ્છગણ્ડદર્પણમ્ ।
કુન્દપુષ્પમાનચોરદન્તકાન્તિભાસુરં
શૃઙ્ગશૈલવાસિનં નમામિ કાલભૈરવમ્ ॥ ૫॥

કાશિકાદિદિવ્યદેશવાસલોલમાનસં
પાશિવાયુકિન્નરેશમુખ્યદિગ્ધવાર્ચિતમ્ ।
નાશિતાઘવૃન્દમઙ્ઘ્રિનમ્રલોકયોગદં
શૃઙ્ગશૈલવાસિનં નમામિ કાલભૈરવમ્ ॥ ૬॥

સારમાગમસ્ય તુઙ્ગસારમેયવાહનં
દારિતાન્તરાન્ધ્યમાશુ નૈજમન્ત્રજાપિનામ્ ।
પૂરિતાખિલેષ્ટમષ્ટમૂર્તિદિહસમ્ભવં
શ‍ૃઙ્ગશૈલવાસિનં નમામિ કાલભૈરવમ્ ॥ ૭॥

કાલભીતિવારણં કપાલપાણિશોભિતં
ખણ્ડિતામરારિમિન્દુબાલશોભિમસ્તકમ્ ।
ચણ્ડબુદ્ધિદાનદક્ષમક્ષતાત્મશાસનં
શ‍ૃઙ્ગશૈલવાસિનં નમામિ કાલભૈરવમ્ ॥ ૮॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીકાલભૈરવાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Kalabhairavashtakam*
pdf was typeset on June 20, 2020

Please send corrections to *sanskrit@cheerful.com*